# Shri Ganeshadvadashangeshumantrah

# શ્રીગણેશદ્વાદશાઙ્ગેષુમન્ત્રાઃ

## Document Information

Text title : Shri Ganeshadvadashangeshumantrah

File name : gaNeshadvAdashAngeShumantrAH.itx

Category : ganesha, mudgalapurANa, dvAdasha, mantra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM panchamaH khaNDaH | adhyAyaH 24 | 5.24. 11-18||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીગણેશદ્વાદશાઙ્ગેષુમન્ત્રાઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

અર્ચનં દ્વાદશાઙ્ગેષુ યઃ કુર્યાન્ મન્ત્રપૂર્વકમ્ ।

સર્વાઙ્ગલેપનેનૈવ તત્ર મન્ત્રાન્ શ‌ૃણુ પ્રભો ॥ ૧૧॥

ગણેશોચ્છિષ્ટગન્ધં વૈ ગૃહ્યાદૌ નિયતો ન્યસેત્ ।

સ્વાનન્દવાસિને જપ્ત્વા નમો મૂર્ધાનમર્ચયેત્ ॥ ૧૨॥

લલાટં ગણનાથાય નમ ઉચ્ચાર્ય ચાર્ચયેત્ ।

દક્ષિણં કર્ણમૂલં ચ ગજકર્ણાય વૈ નમઃ ॥ ૧૩॥

વામકર્ણં તથા દક્ષ શૂર્પકર્ણાય તે નમઃ ।

અર્ચયેચ્ચ તતઃ કણ્ઠં વિઘ્નેશાય તતઃ પઠન્ ॥ ૧૪॥

બાહું દક્ષિણગં તદ્વદ્ હેરમ્બાય નમોઽર્ચયેત્ ।

વામં સમર્ચયેત્ સુજ્ઞઃ સિદ્ધિનાથાય વૈ નમઃ ॥ ૧૫॥

હૃદયં ચાર્ચયેત્તત્ર બુદ્ધીશાય નમો વિધે ।

ઉદરં નાભિસંસ્થાનં નમો લમ્બોદરાય તે ॥ ૧૬॥

દક્ષિણં ચૈવ કુક્ષિં સ વક્રતુણ્ડાય વૈ નમઃ ।

વામં તુ ચિન્તામણયે હ્યર્ચયેન્નાત્ર સંશયઃ ॥ ૧૭॥

પૃષ્ઠદેશં નાભિસમમર્ચયેત્ ઢુણ્ઢયે નમઃ ।

એતે દ્વાદશ મન્ત્રાશ્ચ કથિતાસ્તે પ્રજાપતે ॥ ૧૮॥

ઇતિ શ્રીગણેશદ્વાદશાઙ્ગેષુમન્ત્રાઃ સમ્પૂર્ણાઃ ॥

- ॥ મુદ્ગલપુરાણં પઞ્ચમઃ ખણ્ડઃ । અધ્યાયઃ ૨૪ । ૫.૨૪। ૧૧-૧૮॥

- .. mudgalapurANaM pa nchamaH khaNDaH . adhyAyaH 24 . 5.24. 11-18..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganeshadvadashangeshumantrah*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*